# Puruṣha Sūktam

[KYV – TA 3-12-1 to 3-13-2]
*& [RV S 10-90 ; SYVM 31 ; SYVK 35 ; SV 617 ; AV 19-6]*

ॐ तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये ।
दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।
शं नो , अस्तु द्विपदे । शं चतुष्पदे ॥

ॐ tat'chhañ'yōrāvṛṇīmahē | gātuñ' yaj'ñāya |
gātuñ' yaj'ñapatayē | daivīīs' svas'tiras'tu naḥa |
svas'tir'mānuṣhēbh'yaḥa | ūr'dhvañ' jigātu bhēṣhajam |
śhan' nō , as'tud' dvipadēē | śhañ' chatuṣh'padē |

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।
sahas'raśhīr'ṣhā puruṣhaḥa |
sahas'rāk'ṣhas' sahas'rapā-te |

स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद् दशाङ्गुलम् ॥ १ ॥
sa bhūmiṁ' viśh'vatō vṛt'vā |
at'yatiṣh'ṭhad' daśhāṅ'gulam || 1 ||

पुरुष , एवेदꣳ सर्वम् । यद् भूतं यच्च भव्यम् ।
puruṣha , ēvēdagm' sar'vam'm |
yad' bhūtañ' yat'cha bhav'yam'm |

उतामृतत्त्वस्येशानः । यदन्नेनातिरोहति ॥ २ ॥
utāmṛtat'tvas'yēśhānaḥa | yadan'nēnātirōhati || 2 ||

www.sai-veda.net

एतावानस्य महिमा । अतो ज्यायाꣳश्च पूरुषः ।

ētāvānas'ya mahimā । atōj' jyāyāgeśh'cha pūruṣhaḥa ।

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥ ३ ॥

pādōō (a)s'ya viśh'vā bhūtāni ।

tripādas'yāmṛtan' divi ॥ 3 ॥

त्रिपादूर्ध्व , उदैत् पुरुषः । पादोऽस्येहाऽऽभवात्पुनः ।

tripādūr'dhva , udait' puruṣhaḥa ।

pādōō (a)s'yēhā (ā)bhavāt' punaḥa ।

ततो विष्वङ्व्यक्रामत् । साशनानशने , अभि ॥ ४ ॥

tatō viṣh'vaṅ' vyak'rāmate ।

sāśhanānaśhanē , abhi ॥ 4 ॥

तस्माद् विराडजायत । विराजो , अधि पूरुषः ।

tas'māād' virāḍajāyata । virājō , adhi pūruṣhaḥa ।

स जातो , अत्यरिच्यत । पश्चाद् भूमिमथो पुरः ॥ ५ ॥

sa jātō , at'yarit'chyata ।

paśh'chād' bhūmimathō puraḥa ॥ 5 ॥

यत् पुरुषेण हविषा । देवा यज्ञमतन्वत ।

yat' puruṣhēṇa haviṣhāā ।

dēvā yaj'ñamatan'vata ।

वसन्तो , अस्याऽऽसीदाज्यम् । ग्रीष्म , इध्मः शरद्धविः ॥ ६ ॥

vasan'tō , as'yā (ā)sīdāj'yam'm ।

grīṣh'ma , idh'maśh' śharad'dhaviḥi ॥ 6 ॥

सप्तास्याऽऽसन्परिधयः । त्रिस्सप्त समिधः कृताः ।

sap’tās’yā (ā)san’ paridhayaḥa ।
tris’sap’ta samidha[hk]’ kṛtā-ḥa ।

देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ॥७॥

dēvā yad’yaj’ñan’ tan’vānā-ḥa ।
abadh’nan’ puruṣham’ paśhum ॥ 7 ॥

तं यज्ञं बर्हिषि प्रौक्षन्न् । पुरुषं जातमग्रतः ।

tañ’ yaj’ñam’ bar’hiṣhip’ prauk’ṣhan’ne ।
puruṣhañ’ jātamag’rataḥa ।

तेन देवा , अयजन्त । साध्या , ऋषयश्च ये ॥८॥

tēna dēvā , ayajan’ta । sādh’yā , ṛṣhayaśh’cha yē ॥ 8 ॥

तस्माद् यज्ञात् सर्वहुतः । सम्भृतं पृषदाज्यम् ।

tas’māād’ yaj’ñāt’ sar’vahutaḥa ।
sam’bhṛtam’ pṛṣhadāj’yam ।

पशूꣳस्ताꣳश्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये ॥९॥

paśhūges’tāgeśh’chak’rē vāyav’yāne ।
āraṇ’yān’ grām’yāśh’cha yē ॥ 9 ॥

तस्माद् यज्ञात् सर्वहुतः । ऋचस्सामानि जज्ञिरे ।

tas’māād’ yaj’ñāt’ sar’vahutaḥa ।
ṛchas’ sāmāni jaj’ñirē ।

छन्दाꣳसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥१०॥

chhan’dāgm’si jaj’ñirē tas’māāte ।

yajus’ tas’mādajāyata ॥ 10 ॥

www.SaiVeda.net

तस्मा॒दश्वा॑ , अजायन्त । ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॓त् । तस्मा॓ज्जा॒ता , अ॑जा॒वय॑ः ॥ ११ ॥
tas'mādaśh'vā , ajāyan'ta । yē kē chōbhayādataḥa ।
gāvō ha jaj'ñirē tas'mā̄te ।
tas'māāj'jātā , ajāvayaḥa ॥ 11 ॥

यत् पु॒रु॑षं॒ व्य॑दधुः । क॒ति॒धा व्य॑कल्पयन् ।
मुखं॒ किम॑स्य॒ कौ बा॒हू । कावू॒रूपादा॑वुच्येते ॥ १२ ॥
yat' puruṣham' vyadadhuḥu ।
katidhāv' vyakal'payan'ne ।
mukhaṅ' kimas'ya kau bāhū ।
kāvūrūpādāvut'chyētē ॥ 12 ॥

ब्रा॒म्ह॒णो॓ऽस्य॒ मुख॑मासीत् । बा॒हू रा॑ज॒न्य॑ः कृ॒तः ।
brām'haṇō (a)s'ya mukhamāsī-te ।
bāhū rājan'ya[hk]' kṛtaḥa ।

ऊ॒रू तद॑स्य॒ यद् वैश्य॑ः । प॒द्भ्यां॒ शू॒द्रो , अ॑जायत ॥ १३ ॥
ūrū tadas'ya yad' vaiśh'yaḥa ।
pad'bhyāgm' śhūd'rō , ajāyata ॥ 13 ॥

च॒न्द्रमा॒ मन॑सो जा॒तः । चक्षो॒स्सूर्यो॓ , अजायत ।
chand'ramā manasō jātaḥa ।
chak'shōs'sūr'yō , ajāyata ।

मु॒खा॒दिन्द्र॑श्चा॒ग्निश्च॑ । प्रा॒णाद् वा॒युर॑जायत ॥ १४ ॥
mukhādin'draśh'chāg'niśh'cha ।
prāṇād' vāyurajāyata ॥ 14 ॥



www.SaiVeda.net

नाभ्या॑ , आसीद्न्तरि॑क्षम् । शी॒र्ष्णो द्यौस्सम॑वर्तत ।
nābh’yā , āsīdan’tarik’ṣham ।
śhīr’ṣhṇōd’ dyaus’samavar’tata ।

प॒द्भ्याम् भूमि॒र्दिशश्श्रोत्रा॑त् । तथा॑ लो॒काꣳ , अ॑कल्पयन् ॥ १५॥
pad’bhyām’ bhūmir’ diśhaśh’ śhrōt’rāāte ।
tathā lōkāgm’ , akal’payan’ne ॥ 15 ॥

वेदा॒हमे॒तं पुरु॑षं म॒हान्तम्॑ । आ॒दि॒त्यव॑र्णं तम॑स॒स्तु पा॒रे ।
vēdāhamētam’ puruṣham’ mahān’tam’m ।
ādit’yavar’ṇan’ tamasas’tu pārē ।

सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीरः॑ ।
नामा॑नि कृ॒त्वाऽभि॒वद॒न् यदास्ते᳚ ॥ १६ ॥
sar’vāṇi rūpāṇi vichit’ya dhīraḥa ।
nāmāni kṛt’vā (a)bhivadane yadās’tēē ॥ 16 ॥

धा॒ता पु॒रस्ता॒द्य॒मुदा॑ज॒हार॑ । श॒क्रः प्रवि॒द्वान्प्र॒दिश॒श्चत॑स्रः ।
dhātā puras’tād’ yamudājahāra ।
śhak’ra[fp]’ pravid’vān’pradiśhaśh’chatas’raḥa ।

तमे॒वं वि॒द्वान॒मृत॑ , इ॒ह भ॑वति । नान्यः पन्था॒ , अय॑नाय विद्यते ॥ १७॥
tamēvaṁ’ vid’vānamṛta , iha bhavati ।
nān’ya[fp]’ pan’thā , ayanāya vid’yatē ॥ 17 ॥

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः । तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
yaj’ñēna yaj’ñamayajan’ta dēvā-ḥa ।
tāni dhar’māṇip’ prathamān’yāsan’ne ।

ते ह॒ नाकं॑ महि॒मानः॑ सचन्ते । यत्र॒ पूर्वे॑ सा॒ध्यास्सन्ति॑ दे॒वाः ॥१८॥

tē ha nākam' mahimānas' sachan'tē ||
yat'ra pūr'vē sādh'yās'san'ti dēvā-ḥa || 18 ||

अ॒द्भ्यस्सम्भू॑तः पृथि॒व्यै रसाँ॑च्च । वि॒श्वक॑र्मण॒स्सम॑वर्त॒ताधि॑ ।

ad'bhyas'sam'bhūta[fp]' pṛthiv'yai rasāāt'cha |
viśh'vakar'maṇas'samavar'tatādhi |

तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति । तत्पुरु॑षस्य॒ विश्व॒माजा॑न॒मग्रे॑ ॥१९॥

tas'yat' tvaṣh'ṭā vidadhad'rūpamēti |
tat'puruṣhas'ya viśh'vamājānamag'rēē || 19 ||

वेदा॒हमे॒तं पुरु॑षं म॒हान्त॑म् । आ॒दि॒त्यव॑र्णं॒ तम॑स॒ः पर॑स्तात् ।

vēdāhamētam' puruṣham' mahān'tam'm |
ādit'yavar'ṇan' tamasa[fp]' paras'tā-te |

तमे॒वं वि॒द्वान॒मृत॑ , इ॒ह भ॑वति । नान्यः पन्था॑ विद्य॒तेऽय॑नाय ॥२०॥

tamēvaṁ' vid'vānamṛta , iha bhavati |
nān'ya[fp]' pan'thā vid'yatē (a)yanāya || 20 ||

प्र॒जाप॑तिश्चरति॒ गर्भे॑ , अ॒न्तः । अ॒जाय॑मानो बहु॒धा वि॒जाय॑ते ।

prajāpatiśh'charati gar'bhē , an'taḥa |
ajāyamānō bahudhā vijāyatē |

तस्य॒ धीरा॒ः परि॑जानन्ति॒ योनि॑म् ।
मरी॑चीनां प॒दमि॑च्छन्ति वे॒धस॑ः ॥२१॥

tas'ya dhīrā[fp]' parijānan'ti yōnim'm |
marīchīnām' padamit'chhan'ti vēdhasaḥa || 21 ||

www.sai-veda.net

यो दे॒वेभ्य॒ , आत॑पति । यो दे॒वानां॑ पु॒रोहि॑तः ।
yō dēvēbh’ya , ātapati | yō dēvānaām’ purōhitaḥa |

पूर्वो॑ यो दे॒वेभ्यो॑ जा॒तः । नमो॑ रु॒चाय॒ ब्राम्ह॑ये ॥२२॥
pūr’vō yō dēvēbh’yō jātaḥa |
namō ruchāyab’ brām’hayē || 22 ||

रुचं॑ ब्राम्हं॒ ज॒नय॑न्तः । दे॒वा , अग्रे॒ तद॑ब्रुवन् ।
rucham’ brām’hañ’ janayan’taḥa |
dēvā , ag’rē tadab’ruvan’ne |

यस्त्वैवं ब्राँ॑म्ह॒णो वि॒द्यात् । तस्य॑ दे॒वा , अस॒न्वशे॑ ॥२३॥
yas’tvaivam’ braām’haṇō vid’yā-te |
tas’ya dēvā , asan’ vaśhēē || 23 ||

ह्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्यौ॑ । अ॒हो॒रा॒त्रे पा॒र्श्वे ।
hrīśh’cha tē lak’ṣhmīśh’cha pat’nyauū |
ahōrāt’rē pār’śhvē |

नक्ष॑त्राणि रू॒पम् । अ॒श्विनौ॒ व्यात्त॑म् ।
nak’ṣhat’rāṇi rūpam | aśh’vinauv’ vyāt’tam’m |

इ॒ष्टं म॑निषाण । अ॒मुं म॑निषाण ।
सर्वं॑ मनिषाण ॥२४॥ (तच्छंयोरावृ॑णीमहे...)
iṣh’ṭam’ maniṣhāṇa | amum’ maniṣhāṇa |
sar’vam’ maniṣhāṇa || 24 || (tat’chhañ’ yōrāvṛṇīmahē...)

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ||



www.saiveda.net